अर्धनारीश्वराष्टकं

अर्धनारीश्वराष्टकं

अंभोधरश्यामलकुंतलायै
तटित्प्रभाताम्रजटाधराय |
निरीश्वरायै निखिलेश्वराय
नमः शिवायै च नमः शिवाय || 1 ||

प्रदीप्तरत्नोज्ज्वलकुंडलायै
स्फुरन्महापन्नगभूषणाय |
शिवप्रियायै च शिवप्रियाय
नमः शिवायै च नमः शिवाय || 2 ||

मंदारमालाकलितालकायै
कपालमालांकितकंधराय |
दिव्यांबरायै च दिगंबराय
नमः शिवायै च नमः शिवाय || 3 ||

कस्तूरिकाकुंकुमलेपनायै
श्मशानभस्मांगविलेपनाय |
कृतस्मरायै विकृतस्मराय
नमः शिवायै च नमः शिवाय || 4 ||

पादारविंदार्पितहंसकायै
पादाब्जराजत्फणिनूपुराय |
कलामयायै विकलामयाय
नमः शिवायै च नमः शिवाय || 5 ||

प्रपंचसृष्ट्युन्मुखलास्यकायै
समस्तसंहारकतांडवाय |
समेक्षणायै विषमेक्षणाय
नमः शिवायै च नमः शिवाय || 6 ||

प्रफुल्लनीलोत्पललोचनायै
विकासपंकेरुहलोचनाय |
जगज्जनन्यै जगदेकपित्रे
नमः शिवायै च नमः शिवाय || 7 ||

अंतर्बहिश्चोर्ध्वमधश्च मध्ये
पुरश्च पश्चाच्च विदिक्षु दिक्षु |
सर्वं गतायै सकलं गताय
नमः शिवायै च नमः शिवाय || 8 ||

उपमन्युकृतं स्तोत्रमर्धनारीश्वराह्वयं |
यः पठेच्छृणुयाद्वापि शिवलोके महीयते || 9 ||

इति श्रीउपमन्युविरचितं अर्धनारीश्वराष्टकं ||